# जागर्तु भारते स्वत्वम्

‘बलसागर भारत होवो’ या सानेगुरुजीकृत गीताचा - संस्कृत भावानुवाद

---

जागर्तु भारते स्वत्वम् । ब्रह्माण्डे सकलवरिष्ठम् ॥ धृ. ॥
व्रतमिवाचरितमाजीवम् । सेवार्थ एव सर्वस्वम् ।
देशार्थ एव मे श्वसनम् । स्वीकर्तुमुत्सहे मरणम् ॥१ ॥
भूतिमत् करिष्ये राष्टम् । स्वायत्तं चापि समर्थम् ।
घोरमित् हनिष्ये तिमिरम् । साधवो ददतु साहाय्यम् ॥२॥
संगृह्य पाणिना पाणिम् । संयोज्य चेतसा चित्तम् ।
संजप्य चैकतामंत्रम् । करवामः श्रेयः कार्यम् ॥३॥
उन्नीय केतनं दिव्यम् । कुर्याम भारतस्तवनम् ।
दर्शयाम शौर्यमजस्त्रम् । प्राप्नुयाम जननीं विभवम् ॥४॥
उत्तिष्ठत जाग्रत कामम् । चरतु वै पुमर्थं दिव्यम् ।
अन्यथा जीवनं व्यर्थम् । भाग्यभानुरयतामुदयम् ॥५॥
मातृभूराप्नुयात् स्वत्वम् । वैभवं पुनरहो दिव्यम् ।
एधतां शान्तिराविश्वम् । समुदेतु वासरः शीघ्रम् ॥६॥

*****

वैद्य श्रीनिवास पु. हिर्लेकर

**(By: Vaidya Shriniwas P. Hirlekar)**